This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

933

१५

॥अथवेदांतसूत्रारंभदलमिदं॥

Acc. No. ~~4974~~ M-1844
Title - वेदान्तसूत्राणि
Author - बादरायण
Date - ?
Subject - दर्शन, वेदान्त.
folio - 16
Xerox - 32.

KKSU LIBRARY
RAMTEK
441 106
M-1844
Dist. Nagpur

Checked 2012



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१॥ श्रीगणेशायनमः॥ ॥अथातोब्रह्मजिज्ञासा॥१॥जन्माद्यस्ययतः॥२॥शा
स्त्रयोनित्वात्॥३॥तत्तुसमन्वयात्॥४॥ईक्षतेर्नाशब्दं॥५॥गौणश्चेन्नात्म
शब्दात्॥६॥तन्निष्ठस्यमोक्षोपदेशात्॥७॥हेयत्वावचनाच्च॥८॥स्वाप्यया
त्॥९॥गतिसामान्यात्॥१०॥श्रुतत्वाच्च॥११॥आनंदमयोभ्यासात्॥१२॥
विकारशब्दान्नेतिचेन्नप्राचुर्यात्॥१३॥तद्धेतुव्यपदेशाच्च॥१४॥मांत्रव
र्णिकमेवचगीयते॥१५॥नेतरोनुपपत्तेः॥१६॥भेदव्यपदेशाच्च॥१७॥का ॥हृस्व॥
माच्चनानुमानापेक्षा॥१८॥अस्मिन्नस्यचतद्योगंशास्ति॥१९॥अंतस्त ॥१॥
द्धर्मोपदेशात्॥२०॥भेदव्यपदेशाच्चान्यः॥२१॥आकाशस्तल्लिंगात्॥२२॥
अतएवप्राणः॥२३॥ज्योतिश्चरणाभिधानात्॥२४॥छंदोभिधानान्नेति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चेन्न तथा चेतोर्पणनिगदात्तथा हि दर्शनं ॥२५॥ भूतादिपादव्यपदेशोपप
त्तेश्चैवं ॥२६॥ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥२७॥ प्रा
णस्तथानुगमात् ॥२८॥ न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबंधभूमा
ह्यस्मिन् ॥२९॥ शास्त्रदृष्ट्या तूपदेशो वामदेववत् ॥३०॥ जीवमुख्यप्राण
लिंगान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥३१॥ इति प्र
थमाध्यायस्य प्रथमचरणः ॥ ॥१॥ ॥ सर्वत्रप्रसिद्धोपदेशात् ॥१॥ विवक्षि
तगुणोपपत्तेश्च ॥२॥ अनुपपत्तेस्तु न शारीरः ॥३॥ कर्मकर्तृव्यपदेशाच्च ॥
॥४॥ शब्दविशेषात् ॥५॥ स्मृतेश्च ॥६॥ अर्भकौकस्त्वात्तद्व्यपदेशाच्च ने
ति चेन्न निचाय्यत्वादेवं व्योमवच्च ॥७॥ संभोगप्राप्तिरिति चेन्न वैशेष्या



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२॥ तू॥८॥अत्ता चराचरग्रहणात्॥९॥प्रकरणाच्च॥१०॥गुहांप्रविष्टावात्मा
नौ हि तद्दर्शनात्॥११॥विशेषणाच्च॥१२॥अंतर उपपत्तेः॥१३॥स्थाना
दिव्यपदेशाच्च॥१४॥सुखविशिष्टाभिधानादेव च॥१५॥श्रुतोपनिष
त्कगत्यभिधानाच्च॥१६॥अनवस्थितेरसंभवाच्च नेतरः॥१७॥अं
तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात्॥१८॥न च स्मार्तमतद्धर्माभिला ॥हस्म॥
पात्॥१९॥शारीरश्चोभयेपि हि भेदेनैनमधीयते॥२०॥अदृश्यत्वादि
गुणको धर्मोक्तेः॥२१॥विशेषणभेदव्यपदेशाभ्यां च नेतरौ॥२२॥रू ॥२॥
पोपन्यासाच्च॥२३॥वैश्वानरः साधारणशब्दविशेषात्॥२४॥स्मर्यमा
णमनुमानं स्यादिति॥२५॥शब्दादिभ्योंतः प्रतिष्ठानान्नेति चेन्न तथा दृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ट्युपदेशादसंभवात्पुरुषमपिचैनमधीयते॥२६॥अतएवनदेवताभूतं
च॥२७॥साक्षादप्यविरोधंजैमिनिः॥२८॥अभिव्यक्तेरित्याश्मरथ्यः॥२९॥
अनुस्मृतेर्बादरिः॥३०॥संपत्तेरितिजैमिनिस्तथाहिदर्शयति॥३१॥आमनं
तिचैनमस्मिन्॥३२॥ ॥इतिप्रथमाध्यायस्यद्वितीयःपादः॥ ॥२॥ ॥द्युभ्वा
द्यायतनंस्वशब्दात्॥१॥मुक्तोपसृप्यव्यपदेशात्॥२॥नानुमानमतच्छब्दा
त्॥३॥प्राणभृच्च॥४॥भेदव्यपदेशाच्च॥५॥प्रकरणात्॥६॥स्थित्यदना
भ्यांच॥७॥भूमासंप्रसादादध्युपदेशात्॥८॥धर्मोपपत्तेश्च॥९॥अक्षर
मंबरांतधृतेः॥१०॥साचप्रशासनात्॥११॥अन्यभावव्यावृत्तेश्च॥१२॥ई
क्षतिकर्मव्यपदेशात्सः॥१३॥दहरउत्तरेभ्यः॥१४॥गतिशब्दाभ्यांतथाहिदृ



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ ब्रसूत ॥ ॥ सूत्राणि ॥

॥ ३ ॥

ष्टं लिंगं च ॥१५॥ धृतेश्च महिम्नोस्यास्मिन्नुपलब्धेः ॥१६॥ प्रसिद्धेश्च ॥१७॥
इतरपरामर्शात्स इति चेन्नासंभवात् ॥१८॥ उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥
॥१९॥ अन्यार्थश्च परामर्शः ॥२०॥ अल्पश्रुतेरिति चेत्तदुक्तं ॥२१॥ अनुकृ
तेस्तस्य च ॥२२॥ अपि च स्मर्यते ॥२३॥ शब्दादेव प्रमितः ॥२४॥ हृद्यपेक्षया
तु मनुष्याधिकारत्वात् ॥२५॥ तदुपर्यपि बादरायणः संभवात् ॥२६॥ विरो ॥ ३म ॥
धः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥२७॥ शब्द इति चेन्नातः प्रभवा
त्प्रत्यक्षानुमानाभ्यां ॥२८॥ अत एव च नित्यत्वं ॥२९॥ समाननामरूपत्वाच्चा ॥ ३ ॥
वृत्तावप्यविरोधो दर्शनात्स्मृतेश्च ॥३०॥ मध्वादिष्वसंभवादनधिकारं जै
मिनिः ॥३१॥ ज्योतिषि भावाच्च ॥३२॥ भावं तु बादरायणोस्ति हि ॥३३॥ शुगस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदनादरश्रवणात्तदाद्रवणात्सूच्यते हि ॥३४॥ क्षत्रियत्वगतेश्चोत्तरत्र चै
त्ररथेन लिंगात् ॥३५॥ संस्कारपरामर्शात्तदभावाभिलापाच्च ॥३६॥ तदभा
वनिर्धारणे च प्रवृत्तेः ॥३७॥ श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च ॥३८॥ कं
पनात् ॥३९॥ ज्योतिर्दर्शनात् ॥४०॥ आकाशोऽर्थान्तरत्वादिव्यपदेशात् ॥४१॥
सुषुप्त्युत्क्रान्त्योर्भेदेन ॥४२॥ पत्यादिशब्देभ्यः ॥४३॥ ॥ इति प्रथमाध्यायस्य
तृतीयः पादः ॥ ॥३॥ ॥ आनुमानिकमप्येकेषामिति चेन्न शरीररूपकवि
न्यस्तगृहीतेर्दर्शयति च ॥१॥ सूक्ष्मं तु तदर्हत्वात् ॥२॥ तदधीनत्वादर्थवत् ॥
॥३॥ ज्ञेयत्वावचनाच्च ॥४॥ वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥५॥ त्रयाणा
मेव चैवमुपन्यासः प्रश्नश्च ॥६॥ महद्वच्च ॥७॥ चमसवदविशेषात् ॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्योतिरुपक्रमा तु तथा ह्यधीयत एके॥९॥ कल्पनोपदेशाच्च मध्वादिवद
विरोधः॥१०॥ न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च॥११॥ प्राणाद
यो वाक्यशेषात्॥१२॥ ज्योतिषैकेषामसत्यन्ने॥१३॥ कारणत्वेन चाकाशा
दिषु यथाव्यपदिष्टोक्तेः॥१४॥ समाकर्षात्॥१५॥ जगद्वाचित्वात्॥१६॥
जीवमुख्यप्राणलिंगान्नेति चेत्तद्व्याख्यातं॥१७॥ अन्यार्थं तु जैमिनिः
प्रश्नव्याख्यानाभ्यामपि चैवमेके॥१८॥ वाक्यान्वयात्॥१९॥ प्रतिज्ञासिद्धे
र्लिंगमाश्मरथ्यः॥२०॥ उत्क्रमिष्यत एवंभावादित्यौडुलोमिः॥२१॥ अव
स्थितेरिति काशकृत्स्नः॥२२॥ प्रकृतिश्च प्रतिज्ञादृष्टांतानुपरोधात्॥
॥२३॥ अभिध्योपदेशाच्च॥२४॥ साक्षाच्चोभयाम्नानात्॥२५॥ आत्म



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कृतेः परिणामात्॥२६॥ योनिश्च हि गीयते॥२७॥ एतेन सर्वे व्याख्याता व्या
ख्याताः॥२८॥ ॥इति प्रथमाध्यायस्य चतुर्थः पादः॥ ॥४॥ ॥इति प्रथमाध्यायः
समाप्तः॥ ॥१॥ ॥स्मृत्यनवकाशदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदो
षप्रसंगात्॥१॥ इतरेषां चानुपलब्धेः॥२॥ एतेन योगः प्रत्युक्तः॥३॥ न विल
क्षणत्वादस्य तथात्वं च शब्दात्॥४॥ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्यां॥
॥५॥ दृश्यते तु॥६॥ असदिति चेन्न प्रतिषेधमात्रत्वात्॥७॥ अपीतौ त
द्वत्प्रसंगादसमंजसं॥८॥ न तु दृष्टांतभावात्॥९॥ स्वपक्षदोषाच्च॥१०॥ त
र्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्यविमोक्षप्रसंगः॥११॥ एते
न शिष्टापरिग्रहा अपि व्याख्याताः॥१२॥ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोक



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥५॥ वत्॥१३॥तदनन्यत्वमारंभणशब्दादिभ्यः॥१४॥भावे चोपलब्धेः॥१५॥सत्त्वा
च्चावरस्य॥१६॥असद्व्यपदेशान्नेति चेन्न धर्मांतरेण वाक्यशेषात्॥१७॥
युक्तेः शब्दांतराच्च॥१८॥पटवच्च॥१९॥यथा च प्राणादि॥२०॥इतरव्यपदे
शाद्धिताकरणादिदोषप्रसक्तिः॥२१॥अधिकं तु भेदनिर्देशात्॥२२॥अश्मा
दिवच्च तदनुपपत्तिः॥२३॥उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि॥२४॥
देवादिवदपि लोके॥२५॥कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा॥२६॥श्रु ॥कृस्न॥
तेस्तु शब्दमूलत्वात्॥२७॥आत्मनि चैवं विचित्राश्च हि॥२८॥स्वपक्षदोषा ॥५॥
च्च॥२९॥सर्वोपेता च तद्दर्शनात्॥३०॥विकरणत्वान्नेति चेत्तदुक्तं॥३१॥
न प्रयोजनवत्त्वात्॥३२॥लोकवत्तु लीलाकैवल्यं॥३३॥वैषम्यनैर्घृण्ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नसापेक्षत्वात्तथाहि दर्शयति॥३४॥ नकर्माविभागादितिचेन्नानादित्वात्॥
॥३५॥ उपपद्यतेचाप्युपलभ्यतेच॥३६॥ सर्वधर्मोपपत्तेश्च॥३७॥ इतिद्वि
तीयाध्यायस्य प्रथमः पादः॥ ॥१॥ रचनानुपपत्तेश्चनानुमानं॥१॥ प्रवृ
त्तेश्च॥२॥ पयोंबुवच्चेत्तत्रापि॥३॥ व्यतिरेकानवस्थितेश्चानपेक्षत्वात्॥४॥
अन्यत्राभावाच्चनतृणादिवत्॥५॥ अभ्युपगमेप्यर्थाभावात्॥६॥ पुरुषाश्मव
वदितिचेत्तथापि॥७॥ अंगित्वानुपपत्तेश्च॥८॥ अन्यथानुमितौचशक्ति
वियोगात्॥९॥ विप्रतिषेधाच्चासमंजसं॥१०॥ महद्दीर्घवद्वाह्रस्वपरिमंडला
भ्यां॥११॥ उभयथापिनकर्मातस्तदभावः॥१२॥ समवायाभ्युपगमाच्चसाम्या
दनवस्थितेः॥१३॥ नित्यमेवचभावात्॥१४॥ रूपादिमत्वाच्चविपर्ययोद

KKSU LIBRARY RAMTEK 441 106 M-1844 Dist. Nagpur



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥६॥

र्शनात्॥१५॥ उभयथा च दोषात्॥१६॥ अपरिग्रहाच्चात्यंतमनपेक्षा॥१७॥ समु
दाय उभयहेतुकेपि तदप्राप्तिः॥१८॥ इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमा
त्रनिमित्तत्वात्॥१९॥ उत्तरोत्पादे च पूर्वनिरोधात्॥२०॥ असति प्रतिज्ञोपरो
धो यौगपद्यमन्यथा॥२१॥ प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदा
त्॥२२॥ उभयथा च दोषात्॥२३॥ आकाशे चाविशेषात्॥२४॥ अनुस्मृतेश्च
॥२५॥ नासतोऽदृष्टत्वात्॥२६॥ उदासीनानामपि चैवं सिद्धिः॥२७॥ नाभाव उप
लब्धेः॥२८॥ वैधर्म्याच्च न स्वप्नादिवत्॥२९॥ न भावोऽनुपलब्धेः॥३०॥ क्षणि
कत्वाच्च॥३१॥ सर्वथाऽनुपपत्तेश्च॥३२॥ नैकस्मिन्नसंभवात्॥३३॥ एवं चा
त्माकार्त्स्न्यं॥३४॥ न च पर्यायादप्यविरोधो विकारादिभ्यः॥३५॥ अंत्यावस्थि

॥राम॥

॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेश्चोभयनित्यत्वादविशेषः॥३६॥पत्युरसामंजस्यात्॥३७॥संबंधानुपप
त्तेश्च॥३८॥अधिष्ठानानुपपत्तेश्च॥३९॥करणवच्चेन्न भोगादिभ्यः॥४०॥
अंतवत्त्वमसर्वज्ञता वा॥४१॥उत्पत्त्यसंभवात्॥४२॥न च कर्तुः करणं॥४३॥
विज्ञानादिभावे वा तदप्रतिषेधः॥४४॥विप्रतिषेधाच्च॥४५॥ ॥इति द्विती
याध्यायस्य द्वितीयः पादः॥ ॥२॥ ॥न वियदश्रुतेः॥१॥अस्ति तु॥२॥गौण्य
संभवात्॥३॥शब्दाच्च॥४॥स्याच्चैकस्य ब्रह्मशब्दवत्॥५॥प्रतिज्ञाहानिर
व्यतिरेकाच्छब्देभ्यः॥६॥यावद्विकारं तु विभागो लोकवत्॥७॥एतेन मा
तरिश्वा व्याख्यातः॥८॥असंभवस्तु सतोऽनुपपत्तेः॥९॥तेजोऽतस्तथा ह्या
ह॥१०॥आपः॥११॥पृथिव्यधिकाररूपशब्दांतरेभ्यः॥१२॥तदभिध्याना



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥वेदांत॥

॥८॥

॥सूत्राणि॥

देवतुतल्लिंगात्सः॥१३॥विपर्ययेणतुक्रमोऽतउपपद्यतेच॥१४॥अंतरा
विज्ञानमनसीक्रमेणतल्लिंगादितिचेन्नाविशेषात्॥१५॥चराचरव्यपा
श्रयस्तुस्यात्तद्व्यपदेशोभाक्तस्तद्भावभावित्वात्॥१६॥नात्माश्रुतेर्नि
त्यत्वाच्चताभ्यः॥१७॥ज्ञोतएव॥१८॥उत्क्रांतिगत्यागतीनां॥१९॥स्वात्म
नाचोत्तरयोः॥२०॥नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात्॥२१॥स्व
शब्दोन्मानाभ्यांच॥२२॥अविरोधश्चंदनवत्॥२३॥अवस्थितिवैशेष्या
दितिचेन्नाभ्युपगमाद्धृदिहि॥२४॥गुणाद्वालोकवत्॥२५॥व्यतिरेकोगं
धवत्॥२६॥तथाचदर्शयति॥२७॥पृथगुपदेशात्॥२८॥तद्गुणसार
त्वात्तुतद्व्यपदेशःप्राज्ञवत्॥२९॥यावदात्मभावित्वाच्चनदोषस्तद्दर्शं

॥हरः॥

॥८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नात् ॥३०॥ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥३१॥ नित्योपलब्ध्यनु
पलब्धिप्रसंगोऽन्यतरनियमो वान्यथा ॥३२॥ कर्ता शास्त्रार्थवत्त्वात् ॥३३॥
विहारोपदेशात् ॥३४॥ उपादानात् ॥३५॥ व्यपदेशाच्च क्रियायां न चेन्निर्देश
विपर्ययः ॥३६॥ उपलब्धिवदनियमः ॥३७॥ शक्तिविपर्ययात् ॥३८॥ समा
ध्यभावाच्च ॥३९॥ यथा च तक्षोभयथा ॥४०॥ परात्तु तच्छ्रुतेः ॥४१॥ कृत
प्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥४२॥ अंशो नानाव्यपदे
शादन्यथा चापि दाशकितवादित्वमधीयत एके ॥४३॥ मंत्रवर्णाच्च ॥४४॥
अपि च स्मर्यते ॥४५॥ प्रकाशादिवन्नैवं परः ॥४६॥ स्मरंति च ॥४७॥ अनु
ज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवत् ॥४८॥ असंततेश्चाव्यतिकरः ॥४९॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 

॥८॥ ॐ आभास एव च॥५०॥ ॐ अदृष्टानियमात्॥५१॥ ॐ अभिसंध्यादिष्वपि चैवं॥
॥५२॥ ॐ प्रदेशादिति चेन्नांतर्भावात्॥५३॥ ॥इति द्वितीयाध्यायस्य तृतीयः पा
दः॥ ॥३॥ ॥ तथा प्राणाः॥१॥ गौण्यसंभवात्॥२॥ तत्प्राक्श्रुतेश्च॥३॥ तत्पू
र्वकत्वाद्वाचः॥४॥ सप्तगतेर्विशेषितत्वाच्च॥५॥ हस्तादयस्तु स्थितेऽतो
नैवं॥६॥ ॐ अणवश्च॥७॥ श्रेष्ठश्च॥८॥ न वायुक्रिये पृथगुपदेशात्॥९॥
चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः॥१०॥ ॐ अकरणत्वाच्च न दोषस्तथा हि ॥सूत्र॥
दर्शयति॥११॥ पंचवृत्तिर्मनोवद्व्यपदिश्यते॥१२॥ ॐ अणुश्च॥१३॥ ज्यो ॥८॥
तिराद्यधिष्ठानं तु तदामननात्॥१४॥ प्राणवता शब्दात्॥१५॥ तस्य च नि
त्यत्वात्॥१६॥ त इंद्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्॥१७॥ भेदश्रुतेः॥१८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैलक्षण्याच्च ॥१९॥ संज्ञामूर्त्तिकॢप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥२०॥ मांसादिभौ
मं यथाशब्दमितरयोश्च ॥२१॥ वैशेष्यात्तु तद्वादस्तद्वादः ॥२२॥ इति द्वितीयाध्या
यस्य चतुर्थः पादः ॥ ॥४॥ ॥इति द्वितीयाध्यायः समाप्तः ॥ ॥२॥ ॥तदंतरप्रतिप
त्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां ॥१॥ त्र्यात्मकत्वात्तु भूयस्त्वात् ॥२॥ प्रा
णगतेश्च ॥३॥ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥४॥ प्रथमेऽश्रवणा
दिति चेन्न ता एव ह्युपपत्तेः ॥५॥ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥
॥६॥ भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति ॥७॥ कृतात्ययेऽनुशयवान्दृष्टस्मृ
तिभ्यां यथेतमनेवं च ॥८॥ चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ॥
॥९॥ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥१०॥ सुकृतदुःकृते एवेति तु बाद



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥वे॰ दां॰ त॥ ॥सूत्रालि॥

॥१९॥ रिः॥११॥ अनिष्टादिकारिणामपि च श्रुतं॥१२॥ संयमने त्वनुभूयेतरेषामा
रोहावरोहौ तद्गति दर्शनात्॥१३॥ स्मरंति च॥१४॥ अपि च सप्त॥१५॥ तत्रा
पि च तद्व्यापारादविरोधः॥१६॥ विद्याकर्मणोरिति तु प्रकृतत्वात्॥१७॥
न तृतीये तथोपलब्धेः॥१८॥ स्मर्यतेऽपि च लोके॥१९॥ दर्शनाच्च॥२०॥ तृती
यशब्दावरोधः संशोकजस्य॥२१॥ तत्स्वाभाव्यापत्तिरुपपत्तेः॥२२॥ नातिचि
रेण विशेषात्॥२३॥ अन्याधिष्ठिते पूर्ववदभिलापात्॥२४॥ अशुद्धमिति चे ॥रुद्रम॥
न्न शब्दात्॥२५॥ रेतःसिग्योगोऽथ॥२६॥ योनेः शरीरं॥२७॥ ॥इति तृतीयाध्या ॥१९॥
यस्य प्रथमः पादः॥ ॥१॥ ॥संध्ये सृष्टिराह हि॥१॥ निर्मातारं चैके पुत्रादयश्च॥
॥२॥ मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्॥३॥ सूचकश्च हि श्रुतेरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चक्षते च तद्विदः ॥४॥ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बंधविपर्ययौ ॥५॥ देह
योगाद्वा सोऽपि ॥६॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥७॥ अतः प्रबोधोऽस्मा
त् ॥८॥ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥९॥ मुग्धेऽर्द्धसंपत्तिः परिशेषा
त् ॥१०॥ न स्थानतोऽपि परस्योभयलिंगं सर्वत्र हि ॥११॥ न भेदादिति चेन्न प्रत्ये
कमतद्वचनात् ॥१२॥ अपि चैवमेके ॥१३॥ अरूपवदेव हि तत्प्रधानत्वात् ॥१४॥
प्रकाशवच्चावैयर्थ्यात् ॥१५॥ आह च तन्मात्रं ॥१६॥ दर्शयति चाथो अपि स्म
र्यते ॥१७॥ अत एव चोपमा सूर्यकादिवत् ॥१८॥ अंबुवदग्रहणात्तु न तथात्वं ॥
॥१९॥ वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं ॥२०॥ दर्शनाच्च ॥२१॥
प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥२२॥ तदव्यक्तमाह हि ॥२३॥ अ



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१०॥ पि संराधने प्रत्यक्षानुमानाभ्यां ॥२४॥ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्य
भ्यासात् ॥२५॥ अतोऽनंतेन तथा हि लिंगं ॥२६॥ उभयव्यपदेशात्त्वहिकुंडलवत् ॥
॥२७॥ प्रकाशाश्रयवद्वा तेजस्त्वात् ॥२८॥ पूर्ववद्वा ॥२९॥ प्रतिषेधाच्च ॥३०॥ पर
मतः सेतून्मानसंबंधभेदव्यपदेशेभ्यः ॥३१॥ सामान्यात्तु ॥३२॥ बुद्ध्यर्थः पाद
वत् ॥३३॥ स्थानविशेषात्प्रकाशादिवत् ॥३४॥ उपपत्तेश्च ॥३५॥ तथान्यप्रति ॥कृष्ण॥
षेधात् ॥३६॥ अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥३७॥ फलमत उपपत्तेः ॥
॥३८॥ श्रुतत्वाच्च ॥३९॥ धर्मं जैमिनिरत एव ॥४०॥ पूर्वं तु बादरायणो हेतुव्य ॥१०॥
पदेशात् ॥४१॥ ॥इति तृतीयाध्यायस्य द्वितीयः पादः॥ ॥२॥ ॥सर्ववेदांतप्र
त्ययं चोदनाद्यविशेषात् ॥१॥ भेदान्नेति चेन्नैकस्यामपि ॥२॥ स्वाध्यायस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥३॥ दर्शयति च ॥४॥
उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥५॥ अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥६॥ नवा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥७॥ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥८॥ व्याप्तेश्च समंजसं ॥९॥ सर्वाभेदादन्यत्रेमे ॥१०॥
आनंदादयः प्रधानस्य ॥११॥ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥१२॥ इतरे त्वर्थसामान्यात् ॥१३॥ आध्यानाय प्रयोजनाभावात् ॥१४॥
आत्मशब्दाच्च ॥१५॥ आत्मगृहीतिरितरवदुत्तरात् ॥१६॥ अन्वयादिति चेत्स्यादवधारणात् ॥१७॥ कार्याख्यानादपूर्वं ॥१८॥ समान एवं चाभेदात् ॥१९॥ संबंधादेवमन्यत्रापि ॥२०॥ नवा विशेषात् ॥२१॥ दर्शयति च ॥२२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥११॥ संभृतिद्युव्याप्त्यपि चातः ॥२३॥ पुरुषविद्यायामिव चेतरेषामनाम्नानात् ॥२४॥
वेधाद्यर्थभेदात् ॥२५॥ हानौ तूपायनशब्दशेषत्वात्कुशाच्छंदस्तुत्युपगानव
त्तदुक्तं ॥२६॥ सांपराये तर्तव्याभावात्तथा ह्यन्ये ॥२७॥ छंदत उभयाविरो
धात् ॥२८॥ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥२९॥ उपपन्नस्तल्लक्षणा
र्थोपलब्धेर्लोकवत् ॥३०॥ अनियमः सर्वासामविरोधः शब्दानुमानाभ्यां ॥३१॥ ॥हस्त॥
यावदधिकारमवस्थितिराधिकारिकाणां ॥३२॥ अक्षरधियां त्ववरोधः सा
मान्यतद्भावाभ्यामौपसदवत्तदुक्तं ॥३३॥ इयदामननात् ॥३४॥ अंतरा भू ॥११॥
तग्रामवत्स्वात्मनः ॥३५॥ अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशांतरव
त् ॥३६॥ व्यतिहारो विशिंषंति हीतरवत् ॥३७॥ सैव हि सत्यादयः ॥३८॥ का

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मादीतरत्र [illegible]चायतनादिभ्यः॥३९॥ आदरादलोपः॥४०॥ उपस्थितेऽत
स्तद्वचनात्॥४१॥ तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबंधः फलं॥४२॥
प्रदानवदेव तदुक्तं॥४३॥ लिंगभूयस्त्वात्तद्धि बलीयस्तदपि॥४४॥ पूर्व
विकल्पः प्रकरणात्स्यात्क्रियामानसवत्॥४५॥ अतिदेशाच्च॥४६॥ विद्यैव तु
निर्धारणात्॥४७॥ दर्शनाच्च॥४८॥ श्रुत्यादिबलीयस्त्वाच्च न बाधः॥४९॥ अ
नुबंधादिभ्यः प्रज्ञांतरपृथक्त्ववद्दृष्टश्च तदुक्तं॥५०॥ न सामान्यादप्युपलब्धे
र्मृत्युवन्न हि लोकापत्तिः॥५१॥ परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबंधः॥
॥५२॥ एक आत्मनः शरीरे भावात्॥५३॥ व्यतिरेकस्तद्भावाभावित्वान्न तूप
लब्धिवत्॥५४॥ अंगावबद्धास्तु न शाखासु हि प्रतिवेदं॥५५॥ मंत्रादिवद्वा



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 

॥१२॥ विरोधः॥५६॥भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति॥५७॥नाना शब्दादिभे
दात्॥५८॥विकल्पोऽविशिष्टफलत्वात्॥५९॥काम्यास्तु यथाकामं समुच्चीये
रन्नवा पूर्वहेत्वभावात्॥६०॥अंगेषु यथाश्रयभावः॥६१॥शिष्टेश्च॥६२॥स
माहारात्॥६३॥गुणसाधारण्यश्रुतेश्च॥६४॥नवा तत्सहभावाश्रुतेः॥६५॥
दर्शनाच्च॥६६॥ ॥इति तृतीयाध्यायस्य तृतीयः पादः॥ ॥३॥ ॥पुरुषार्थोऽ ॥रुद्र॥
तः शब्दादिति बादरायणः॥१॥शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः॥ ॥१२॥
॥२॥आचारदर्शनात्॥३॥तच्छ्रुतेः॥४॥समन्वारंभणात्॥५॥तद्वतो विधाना
त्॥६॥नियमाच्च॥७॥अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्॥८॥
तुल्यं तु दर्शनं॥९॥असार्वत्रिकी॥१०॥विभागः शतवत्॥११॥अध्ययनमात्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वतः॥१२॥ नाविशेषात्॥१३॥ स्तुतयेनुमतिर्वा॥१४॥ कामकारेण चैके॥१५॥ उ
पमर्दं च॥१६॥ ऊर्ध्वरेतःसु च शब्दे हि॥१७॥ परामर्शं जैमिनिरचोदना चाप
वदति हि॥१८॥ अनुष्ठेयं बादरायणः साम्यश्रुतेः॥१९॥ विधिर्वा धारणवत्॥
२०॥ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात्॥२१॥ भावशब्दाच्च॥२२॥ पा
रिप्लवार्था इति चेन्न विशेषितत्वात्॥२३॥ तथा चैकवाक्यतोपनिबंधात्॥२४॥
अत एव चाग्नींधनाद्यनपेक्षा॥२५॥ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत्॥२६॥
शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात्॥
॥२७॥ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात्॥२८॥ अबाधाच्च॥२९॥
अपि च स्मर्यते॥३०॥ शब्दश्चातोऽकामकारे॥३१॥ विहितत्वाच्चाश्रमकर्म



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२॥अपि च स्मर्यते॥३७॥२

॥९३॥ पि॥३२॥सहकारित्वेन च॥३३॥सर्वथापि त एवोभयलिंगात्॥३४॥अनभि
भवं च दर्शयति॥३५॥अंतरा चापि तु तद्दृष्टेः॥३६॥विशेषानुग्रहश्च॥३९॥
अतस्त्वितरज्ज्यायो लिंगाच्च॥३९॥तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमा
तद्रूपाभावेभ्यः॥४०॥न चाधिकारिकमपि पतनानुमानात्तदयोगात्॥४१॥उ
पपूर्वमपि त्वेके भावमशनवत्तदुक्तं॥४२॥बहिस्तूभयथापि स्मृतेराचारा
च्च॥४३॥स्वामिनः फलश्रुतेरित्यात्रेयः॥४४॥आर्त्विज्यमित्यौडुलोमिस्तस्मै ॥कृष्ण॥
हि परिक्रीयते॥४५॥श्रुतेश्च॥४६॥सहकार्यंतरविधिः पक्षेण तृतीयं त ॥९३॥
द्वतो विध्यादिवत्॥४७॥कृत्स्नभावात्तु गृहिणोपसंहारः॥४८॥मौनवदितरे
षामप्युपदेशात्॥४९॥अनाविष्कुर्वन्नन्वयात्॥५०॥ऐहिकमप्रस्तुतप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिबंधेतद्दर्शनात् ॥५१॥ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्था
वधृतेः ॥५२॥ इति तृतीयाध्यायस्य चतुर्थः पादः ॥ ॥४॥ ॥ इति तृतीयाध्या
यः समाप्तः ॥ ॥३॥ ॥ आवृत्तिरसकृदुपदेशात् ॥१॥ लिंगाच्च ॥२॥ आत्मेति
तूपगच्छंति ग्राहयंति च ॥३॥ न प्रतीके न हि सः ॥४॥ ब्रह्मदृष्टिरुत्कर्षात् ॥५॥
आदित्यादिमतयश्चांग उपपत्तेः ॥६॥ आसीनः संभवात् ॥७॥ ध्यानाच्च ॥८॥
अचलत्वं चापेक्ष्य ॥९॥ स्मरंति च ॥१०॥ यत्रैकाग्रता तत्राविशेषात् ॥११॥ आ
प्रायणात्तत्रापि हि दृष्टं ॥१२॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्य
पदेशात् ॥१३॥ इतरस्याप्येवमसंश्लेषः पाते तु ॥१४॥ अनारब्धकार्ये एव तु पू
र्वे तदवधेः ॥१५॥ अग्निहोत्रादि तत्कार्यायैव तद्दर्शनात् ॥१६॥ अतोन्यापि हि
तु



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥१४॥ केषामुभयोः ॥१७॥ यदेव विद्ययेति हि ॥१८॥ भोगेन त्वितरे क्षपयित्वा संपद्य
ते ॥१९॥ ॥ इति चतुर्थाध्यायस्य प्रथमः पादः ॥ ॥१॥ ॥ वाङ्मनसि दर्शनाच्छ
ब्दाच्च ॥१॥ अत एव च सर्वाण्यनु ॥२॥ तन्मनः प्राण उत्तरात् ॥३॥ सोऽध्यक्षे तदु
पगमादिभ्यः ॥४॥ भूतेषु तच्छ्रुतेः ॥५॥ नैकस्मिन् दर्शयतो हि ॥६॥ समाना
चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥७॥ तदापीतेः संसारव्यपदेशात् ॥८॥ सू ॥ हस्व ॥
क्ष्मं प्रमाणतश्च तथोपलब्धेः ॥९॥ नोपमर्देनातः ॥१०॥ अस्यैव चोपपत्तेरेष ऊ ॥१४॥
ष्मा ॥११॥ प्रतिषेधादिति चेन्न शारीरात् ॥१२॥ स्पष्टो ह्येकेषां ॥१३॥ स्मर्यते च ॥
॥१४॥ तानि परे तथा ह्याह ॥१५॥ अविभागो वचनात् ॥१६॥ तदोकोऽग्रज्वलनं
तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वाताधिकृया॥१७॥रश्म्यनुसारी॥१८॥निशि नेति चेन्न संबंधस्य यावद्देह
भावित्वाद्दर्शयति च॥१९॥अतश्चायनेपि हि दक्षिणे॥२०॥योगिनः प्रति च
स्मर्यते स्मार्ते चैते॥२१॥ ॥इति चतुर्थाध्यायस्य द्वितीयः पादः॥ ॥२॥ ॥अ
र्चिरादिना तत्प्रथितेः॥१॥वायुमब्दादविशेषविशेषाभ्यां॥२॥तडितोधि व
रुणः संबंधात्॥३॥आतिवाहिकास्तल्लिंगात्॥४॥उभयव्यामोहात्तत्सि
द्धेः॥५॥वैद्युतेनैव ततस्तच्छ्रुतेः॥६॥कार्यं बादरिरस्य गत्युपपत्तेः॥७॥
विशेषितत्वाच्च॥८॥सामीप्यात्तु तद्व्यपदेशः॥९॥कार्यात्यये तदध्यक्षेण
सहातः परमभिधानात्॥१०॥स्मृतेश्च॥११॥परं जैमिनिर्मुख्यत्वात्॥१२॥
दर्शनाच्च॥१३॥न च कार्ये प्रतिपत्त्यभिसंधिः॥१४॥अप्रतीकालंबना



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्यतीति बादरायण उभयथा दोषात्तत्क्रतुश्च ॥१५॥ विशेषं च दर्शयति ॥
॥१६॥ ॥ इति चतुर्थाध्यायस्य तृतीयः पादः ॥ ॥३॥ ॥ संपद्याविर्भावः स्वेन
शब्दात् ॥१॥ मुक्तः प्रतिज्ञानात् ॥२॥ आत्मा प्रकरणात् ॥३॥ अविभागेन
दृष्टत्वात् ॥४॥ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥५॥ चिति तन्मात्रेण तदा
त्मकत्वादित्यौडुलोमिः ॥६॥ एवमप्युपन्यासात्पूर्वभावादविरोधं बाद
रायणः ॥७॥ संकल्पादेव तु तच्छ्रुतेः ॥८॥ अत एव चानन्याधिपतिः ॥९॥
अभावं बादरिराह ह्येवं ॥१०॥ भावं जैमिनिर्विकल्पामननात् ॥११॥ द्वा
दशाहवदुभयविधं बादरायणोऽतः ॥१२॥ तन्वभावे संध्यवदुपपत्तेः ॥१३॥
भावे जाग्रद्वत् ॥१४॥ प्रदीपवदावेशस्तथा हि दर्शयति ॥१५॥ स्वाप्ययसं



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पत्यो रन्यतरापेक्षमाविष्कृतं हि ॥१६॥ जगद्व्यापारवर्ज्यं प्रकरणादसन्निहि-
तत्वाच्च ॥१७॥ प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमंडलस्थोक्तेः ॥१८॥ वि-
कारावर्ति च तथा हि स्थितिमाह ॥१९॥ दर्शयतश्चैवं प्रत्यक्षानुमाने ॥२०॥
भोगमात्रसाम्यलिंगाच्च ॥२१॥ ॐ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥
॥२२॥ ॥ इति चतुर्थाध्यायस्य चतुर्थः पादः ॥ ॥४॥ ॥ इति चतुर्थाध्यायः
समाप्तः ॥ ॥४॥ ॥ इति वेदांतसूत्राणि व्यासकृतानि समाप्तानि ॥ ॥७॥ ॥ प्र-
थमाध्यायस्य प्रथमपादसूत्राणि ३१ ॥ द्वितीयपादसू० ३२ ॥ तृ० पा० सू० ४३ ॥ च०
पा० सू० २८ ॥ एवं १३४ ॥ द्वितीयाध्याय प्र० पा० सू० ३७ ॥ द्वि० पा० सू० ४५ ॥ तृ० पा० सू० ५३ ॥
च० पा० सू० २२ ॥ एवं १५७ ॥ तृ० ध्याय प्र० पा० सू० २७ ॥ द्वि० पा० सू० ४१ ॥ तृ० पा० सू० ६६ ॥ च०



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥वेदांत॥ ॥सूत्राणि॥

॥१६॥ पा॰सू॰४२॥एवं१८६॥च॰ध्यायप्र॰पा॰सू॰१९॥द्वि॰पा॰सू॰२१॥तृ॰पा॰सू॰१६॥
च॰पा॰सू॰२२॥एवं७८॥सर्वसूत्रसंख्या५५५॥अत्रमुख्यसूत्रसंख्या१९२॥
गुणसूत्रसंख्या३६३॥एवं५५५॥ ॥७॥ ॥

॥रुद्रं॥
॥१६॥

KKSU LIBRARY
RAMTEK
441 106
M-1844
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=21.10.20 14:21
,TRANSFERRED=2020/10/21 at 14:26:08
,PAGES=32
,TYPE=STD
,NAME=S0004301
,Book Name=M-1844-VEDANT SUTRANI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection